International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(2): 91-94
© 2017IJSR
www.anantaajournal.com
Received: 18-02-2017
Accepted: 20-03-2017

**मुकेश कुमार झा**
साहित्य विभाग शोधार्थी
कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

**Correspondence**
**मुकेश कुमार झा**
साहित्य विभाग शोधार्थी
कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

# नाटकस्य स्त्रीपात्राणां परिचयः

## मुकेश कुमार झा

**सारांश**
संस्कृतसाहित्यं निजनगरिमाविषये न केवलं भारतवर्षे अपितु अखिलसंसारे विख्यातमस्ति। विश्वस्य विद्वत्मण्डलम् एकस्वरेण अस्य महिमा गायति। किन्तु दुर्भाग्यस्य विषयः अस्ति यत् अस्माकमेव देशे अनेके जनाः सन्ति; ये इदं साहित्यं केवलं 'रोमानी' अस्ति इति संज्ञां दत्वा अद्यतनस्य संघर्षशीलसमाजस्य कृते अयं सर्वथानुपयोगीति वदन्ति। एतस्य प्रचारं–प्रसारमनावश्य्कमिति साधयन्ति। किन्तु प्रत्यक्षे किं प्रमाणम्? भास–कालिदास–शूद्रक–विशाखदत्त–भवभूति–भारवि–माघ–भट्टि–श्रीहर्ष–सुबन्धु–दण्डी–बाण–हर्ष प्रभृतयः स्वनामधन्यकवयः निज़कृतिषु न केवलं साहित्यिक सौन्दर्यमपितु भारतीयसंस्कृतिसभ्यतायाः निदर्शनं राष्ट्रियभावनायाः पोषणमपि च कुर्वन्ति स्म। समाजोपयोगितत्त्वैः परिपूर्णमिदं साहित्यं प्राच्यपाश्चात्ययोः द्वयोरपि कृते सर्वदौबहुमूल्यं भविष्यति।
अस्माकं संस्कृतसाहित्यकारेषु अनेकाः नाटककाराः सन्ति येषां कृतिषु राष्ट्रियभावनायाः सुमधुरं स्वरः श्रूयते। तेषां भासः– कालिदासः –विशाखदत्तः –भवभूतिः– मुरारिः–अनन्तभट्टः–क्षेमेन्द्रः–श्रीहर्ष–विद्यापतिः–नयन चन्द्रसूरिः–चन्द्रशेखरः'– वेङ्कटाध्वरिः–देवराजशर्मा–देवराजशास्त्री इत्यादयः उल्लेखनीयाः सन्ति। किन्तु अतिविस्तारभयेन अस्मिन् शोधपत्रे केवल भासं कालिदासं विशाखदत्तं भवभूतिं च विवेचनार्थं स्वीकरोमि।

**कूटशब्दः** शकुन्तला कालिदासस्यर्वस्वमभिज्ञानशाकुन्तलम् प्रधाननायिका, शकुन्तला बाल्यतारूण्यवत, शकुन्तला अलौकिकसौन्दर्यशालिनी, नाटकस्य नायिका शकुन्तला, शकुन्तला सुशीलस्वभावऽस्ति, शकुन्तला, लज्जाशीलाऽस्ति

**प्रस्तावना**
अस्ति शकुन्तला[1] कालिदासस्य सर्वस्वभूतस्याभिज्ञानशाकुन्तलस्य (कालिदासस्य र्वस्वमभिज्ञानशाकुन्तलम्)[2] प्रधाननायिका। यद्यपि नाट्य शास्त्रीयेषु ग्रन्थेषु नायिकागुणानां प्रतिपादनं नैव कृतमस्ति तथापि नायकगुणा एव प्रायो नायिकास्वपि द्रष्टव्या इति नेनृसामान्यगुणाः-विनीतत्वम्, मधुरता (प्रियदर्शनता) त्यागः, दक्षता, प्रियम्वदता, रूढवंशता, स्थिरता, युवावस्था, बुद्धयुत्साहस्मृतिप्रज्ञाकलादिसमन्वितत्वम् इत्यादयः सर्वे गुणः यथावद्रूपेण परिगणीनयाः। अन्ये च स्त्रीगुणा अपि तत्र द्रष्टव्येति मनसि निधायाभिज्ञानशाकुन्तलनायिकायाः शकुन्तलायाश्चरित्रगतगुणानां मूल्याङ्कनमत्र क्रियते-

**युवती:** अभिज्ञानशाकुन्तले[3] शकुन्तला बाल्यतारूण्यवत कन्येव चित्रिताऽस्ति। तस्याः प्रथमतारूण्यविकासफलभूतसौन्दर्य दर्श दर्श राज़ा कण्वमप्यविवेकिनं मन्यतै-

इदं किलाव्यांजनोहरं वपुस्तपः क्षमं साधयितुं च इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृर्षिव्यवस्यति।।

तस्याः तारूण्यस्यैव फलमस्ति यत् शकुन्तला सूक्ष्ममपि[4] वस्त्रं धारयन्ती स्तनयुगपरिणाहमवश्यमेवाच्छादयति-

इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना वल्कलेन।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कसुरभिनवमस्याःपिनद्धं पाण्डुपत्रोदरेण।।

तस्याः स्तनयुगं क्षणं क्षणं विस्तारं गच्छति। यथा-'हला! अतिपिनद्धेन बल्कलेन प्रियम्बदया दृढ़ पीडिताऽसिम, शिथिलय तावदेनम्' इति शकुन्तलायोक्ता प्रियम्वदा कथयति[5]-

'पयोधरविस्तारहेतुकमात्मनो यौवनारम्भं तावदुपालभस्य किं मामुपालभसे।'
अनेन ज्ञायते शकुन्तला प्राप्तयुवावस्थैका नायिकाऽस्तीति तस्या युवा वस्थागताः विकाराः सन्ति।

**2.अलौकिकसौन्दर्यशालिनी[6]:** शकुन्तला अलौकिकसौन्दर्यशालिन्यस्ति। तस्याः शारीरिकं सौन्दर्य दर्श दर्शमेव राजा तत्प्रेमपाशपतितो जातः। शकुन्तला येन न दृष्टा तस्य चक्षुरेव निष्फलमिति राज्ञो निर्णयः। यथा विदूषकं कथयति-'माघस्य! अनाप्तचक्षुः फलोऽसि येन त्वया द्रष्टव्यानां परं न दृष्टम्। तस्याः सौन्दर्यमेकेनैव श्लोकेन राजा वर्णयन् कथयति-
अनाघ्रातं पुष्पं किसलयमलूनं कररूहै[7]-

रनाबिद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिवं च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति भुवि।।

पूर्व चित्रे परिकल्पितसर्वयोगान् निवेश्य, रूपोच्येन मनसा विधिना सा कृतेति राज्ञो मतमस्ति। अतएव सां स्त्रीरत्नसृष्टिरिति-
चित्रे निवेश्य परिकल्पितसर्वयोगान्

रूपोच्चयेन विधिना विहिता कृशाङ्गी।
स्त्रीरत्नसृष्टिपरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्स वपुश्च तस्याः।।
एवं शकुन्तला समधिकसौन्दर्यशालिन्यस्तीति।[8]

**3. प्रकृतिप्रियाः** अभिज्ञानशाकुन्तलस्य नायिका[9] शकुन्तला प्रकृतिपुत्र्यस्ति। अतएव प्रकृत्या सह तस्याः तादात्म्यमस्ति। सा प्रकृति स्वात्मनः पृथक् न मन्यते। लतास्तस्याः भगिन्यः सन्ति- 'यतो भगिनी मे भवति ततः किमिति न सिञ्चामि? तरवस्तस्याः भ्रातरः सन्ति। यथा-शकुन्तला कथयति नहि केवलं तातनियोग एव ममापि सहोदरस्नेहः एतेषु।' यदा वातेरितं पल्लवं जायते तदा स जानति यत्-"एष पल्लवाङ्गुलिभिः मां व्याहरतीव चूतवृक्षः।"

आश्रमवृक्षेषु तस्यास्तथा प्रेम अस्ति यथा सा तेभ्यः पयो दत्त्वैव जं पिबति तवा प्रियमण्डनापि स्नेहेन पल्लवं नादत्ते-

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।

इत्यादि। मृगपोतान् स कृतकपुत्र इव मनुते-

'सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।'
एवं ज्ञायते शकुन्तला प्रकृतिपुत्र्यस्ति। तस्याः प्रकृत्या सह घनिष्ठतरः सम्बन्धोऽस्ति।

**4. सुशीलाः** शकुन्तला सुशीलस्वभावऽस्ति। राजानं दृष्ट्वा तन्मनसि कामविकारो जायते, किन्तु स्वकीयां कामवेदनामन्तत सा गोपयति सख्यावपि न कथयति। यदा साऽतीवास्वस्था जायते तदा संखीभ्यां पृष्टा सा आभास हेतुका वो भविष्यामि इति कथयति। तथा 'यतः प्रभृति तपोवनरक्षिता स राजर्षिः मे लोचनपथं गच्छति'इति।

अनेन ज्ञायते सा सुशीलास्तीति।

**5. लज्जावती:** शकुन्तला लज्जाशीलाऽस्ति। प्रथमाङ्के यदा राजा तस्याः रूपं प्रशंसति तदा सा- सलज्जमधोमुखी तिष्ठति। यदा प्रियम्बदा तस्याः विवाहपरिचर्या करोति तदा सा ततोऽन्यद् गन्तुमिच्छति। यथा प्रियम्वदा-आर्ये! धर्माचरणपरवश एष जनः। गुरोः पुनरस्याः अनुरूपवरप्रदाने संकल्पः। शकुन्तला-अनसूये! अहं गच्छामि।'इति।
तृतीयाङ्के रहसि राज्ञा सम्बन्धे जाते भूयो भूयस्ततो गन्तुमिच्छति।

**6. सरलस्वभावाः** शकुन्तला सरलस्वभावा नायिकाऽस्ति। यदा सख्यो तस्याः परिहासं कुरूतस्तदा सा- 'एष ते आत्मनश्चित्तगतो मनोरथः।' इति कथयति।

यद्यपि सा कुलपतेः कण्वस्य द्वितीयोच्छ्वास इवास्ति तथापि तन्मनसि अहङ्कारो नास्ति। सख्यावपि तामादेशयतः-'हला शकुन्तले गच्छ। उटजात फलमिश्रमर्ध्यमुपाहर'इति।

एभिरुदाहरणैस्तस्या, स्वभावस्य सरलता ज्ञायते।

**7. पतिपरायणाः** शकुन्तलापतिपरायणाऽस्ति[10]। तस्याः मनः सर्वदा पति पार्श्वे एव भ्रमात। गान्धर्वविवाहविधिना विवाहितायां तस्यां गते च राजनि शकुन्तला निरन्तरं पतिगतमेव चिन्तयति, यत्परिणामेन सा दुर्वाससः शापभाजनं जाता-

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।।

राज्ञा दुष्यन्तेन निराहता सा कण्त्रशिष्ययोरनुगमनं करोति किन्तु शिष्येण-

अथ तु वेत्सि शुचिव्रतमात्मनः
पतिगृहे तव दास्यमपि क्षमम्।

इति श्रुत्वा तत्रैव निवसति। मरीच्याश्रमे निवसन्ती सा सर्वथा त्रियोगिनी नियमान् परिपालयति। यथा-
'वसने परिधूसरे वसाना नियमक्षामधृतैकवेणी।'
इत्यनेन राज्ञो वाक्येन ज्ञायते।

**8. श्रेष्ठजनावरवती:** शकुन्तला पुण्यजनान् प्रति समधिकमादरवत्यस्ति। सा स्वतन्त्रा नास्ति, गुरूजनपरवशास्तीति सा सम्यग्ज्ञानाति। तृतीयाङ्के यदा राजा तत्येवार्थ कथयति तदा-'न माननीयेषु जनेषु आत्मानपराधयिष्यामि'इति कथयति।
पञ्चमाङ्के राज्ञा निराद्दता सा यदा शिष्यावनुगच्छति तदा शिष्येण- 'आः पुरोभागिनि ? किमिदं स्वातन्त्र्यमवलम्बसे'इत्युक्ते सति तत्रैव स्थीयते।

एवं ज्ञायते श्रैष्ठजनान् प्रति शकुन्तला समधिकमादरवत्यस्ति।[11]

शकुन्तला श्चरित्रं नहि केवलं संस्कृतसाहित्ये एव, अपितु विश्वसाहित्ये आदर्शपूर्णमस्ति। अस्याश्चरित्रं पाश्चात्यैरपि विद्वद्भिः मुक्तकण्ठेन प्रशंस्यत इति।

(1) नटी, (2) शकुन्तला (3) अनसूया, (4) प्रियंवदा, (5) गौतमी, ( 6 ) प्रतीहारी, (7) मिलकेशी, (8) परकृतिका, (9) मधुकारिका, (10) चतुरिका (चेटी), (11) तापसी, (12) अदिति इन्द्राणी, ( 13 ) मेनका इत्यादयाः त्रयोदश, ( 14 ) सन्ति।
प्रियंवदा - हला शकुन्तले! इहैव मुहूर्त्तक तिष्ठ। (हला सजन्तले! इधज्जेव मुहूत्तअं चिट्ठ।)
अनसूया–हला शकुन्तले! इयं स्वयंवरवधूः सहकारस्य त्वया कृतनाम धेया वनतोषिणीति नवमालिकाः एनां विस्मृतासि ? (हला सउन्तुले) ।
एवं प्रथमाङ्के शकुन्तलादुष्यन्तयोः परस्परसंदर्शनेन उद्बोधितायाः रतेः परिपुष्टताप्रदर्शनेन विप्रलम्भं वर्णयिष्यन् कविवरः कालिदासः तदुपभोगाय श्रृङ्गार, सहायविशेषस्य हास्यप्रियस्य विदूषकस्य प्रवेशमाह-तत इत्यादिना। ततः-तदनन्तरं विषण्णः-खिन्नः,
विदूषकः- राज्ञो नर्मसहायः हास्यकारी सुहृत्, प्रविशति–रङ्गमञ्चे आविर्भवति।
पुरोधाः-(पुरो गत्वा) स्वस्ति देवाय। देव! एते खलु विधिवदचिंतास्तपस्विनः कश्चिदेतेषु उपाध्याय - सन्देशोऽस्ति, तं देवः श्रोतुमर्हति।
प्रथमा - कथमुपस्थितो मधुमासः। (कधं उपत्थिदो महुमासो[12])
आताम्रहरितवृन्तम् उच्छ्वसितमिव वसन्तमासस्य।
दृष्टं चूताङ्कुरकं क्षणमङ्गल्यं नियच्छामि।।
(आतम्हरिअवेण्टं उस्ससिअं विअ वसन्तमासस्स।
दिट्ठ चूअङकुरअं क्षणमङ्गल्लं निअच्छामि।।)
द्वितीया- परभृतिके! किमेतदेकाकिनी मन्त्रयसे? (परहुदिए! किं एवं एआइणी मन्तेसि?)
मिश्रकेशी - नास्त्यत्र सन्देहः महाप्रभावः खलुः राजर्षिः (णत्थि एत्थ सन्देहो, महाप्पहावो क्खु राएसी)।
चेटी- भर्त्तः अलं सन्तापितेन, वयस्थ एव प्रभुः अपरासु देवीषु अनुरूपपुत्रजन्मना पूर्वपुरुषाणामनृणो भविष्यति। (आत्मगतम्)। न मे वचनं प्रतीच्छति। अनुरूपमपि औषधम् आतङ्क निवर्त्तयति! (भट्टा/अलं सन्दाबिदेन, व अत्थो ज्जेव पहू अवरासु देवीसु अणुरूवपुत्तजम्मेण पुव्वपुरूसाणं अणिणो भविस्सदि/ण मे वअणं पणिच्छदि! अणुरूवं वि ओसधं आदङ्कं णिअत्तेदि)।
मातलिः - (सस्मितम्) आयुष्मन् श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः।
तापसीः- भद्रमुख! न खल्वेष ऋषिकुमारकः। (भद्दमुह! ण क्खु एसो इसिकुमारओ।)
अदितिः- अप्रतिरथो भव। (अप्पदिरधो हीहि।)
(शकुन्तला पुत्रसहिता पादयोः पतति)।

गौतमी- (शान्त्युदकेन शकुन्तलासभ्युक्ष्य[13]) जाते! निराबाधा जीव। अपि लघुसन्तापानि अङ्गानि? (जादे! णिराबाधा मे चिरं जीव। अत्रि लहुसन्दाबाई अङ्गाई? (इति स्पृशति)

पुरोधाः- (राजानं निर्दिश्य) भो भोस्तपस्विनः। असावत्रभवान्[14] वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनः प्रतिपालयति वः, पश्यतैनम्।

प्रतिहारी- देव! प्रसन्नमुखा ऋषयो दृश्यन्ते। (देव! पसण्णमुहा इसीओ दीसन्ति।)

नटी- अथ कतमं पुनः ऋतुमधिकृत्य गास्यामि।

**सन्दर्भ ग्रन्थ सूची**


1. अभिज्ञानशाकुन्तलम्
2. कालिदासस्य साहित्यदर्पण
3. अभिज्ञानशाकुन्तलम्
4. तत्रैव
5. तत्रैव
6. साहित्य दर्पण
7. साहित्यसौन्दर्यश्लोकेन
8. अभिज्ञानशाकुन्लम्
9. तत्रैव
10. तत्रैव
11. साहित्य दर्पण
12. तत्रैव
13. अभिज्ञानशाकुन्तलम्
14. रघुवंशमहाकाव्यम्